# Shrisuktam from Puranas

# શ્રીસૂક્તં પૌરાણીકમ્

## Document Information

Text title : shrIsUktaMpaurANIkam

File name : shrIsUktaMpaurANIkam.itx

Category : devii, lakShmI, devI, sUkta

Location : doc_devii

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Latest update : December 29, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીસૂક્તં પૌરાણીકમ્

દેવ્યભિષેકે પૌરાણં શ્રીસૂક્તમ્ -
હિરણ્યવર્ણાં હિમરૌપ્યહારાં ચન્દ્રાં ત્વદીયાં ચ હિરણ્યરૂપામ્ ।
લક્ષ્મીં મૃગીરૂપધરાં (૧) શ્રિયં ત્વં મદર્થમાકારય જાતવેદઃ ॥ ૧॥

યસ્યાં સુલક્ષ્મ્યામહમાગતાયાં હિરણ્યગોઽશ્વાત્મજમિત્રદાસાન્ ।
લભેયમાશુ હ્યનપાયિનીં તાં મદર્થમાકારય જાતવેદઃ ॥ ૨॥

પ્રત્યાહ્વયે તામહમશ્વપૂર્વાં દેવીં શ્રિયં મધ્યરથાં સમીપમ્ ।
પ્રબોધિનીં હસ્તિસુબૃંહિતેનાહૂતા મયા સા કિલ સેવતાં મામ્ ॥ ૩॥

કાંસોસ્મિતાં તામિહપદ્મવર્ણામાર્દ્રાં સુવર્ણાવરણાં જ્વલન્તીમ્ ।
તૃપ્તાં હિ ભક્તાનથ તર્પયન્તીમુપહ્વયેઽહં કમલાસનસ્થામ્ ॥ ૪॥

લોકે જ્વલન્તીં યશસા પ્રભાસાં ચન્દ્રામુદામુત દેવજુષ્ટામ્ ।
તાં પદ્મરૂપાં શરણં પ્રપદ્યે શ્રિયં વૃણે ત્વોં વ્રજતામલક્ષ્મીઃ ॥ ૫॥

વનસ્પતિસ્તે તપસોઽધિજાતો વૃક્ષોઽથ બિલ્વસ્તરુણાર્કવર્ણે ।
ફલાનિ તસ્ય ત્વદનુગ્રહેણ માયા અલક્ષ્મીશ્ચ નુદન્તુ બાહ્યાઃ ॥ ૬॥

ઉપૈતુ માં દેવસખઃ કુબેરઃ સા દક્ષકન્યા મણિના ચ કીર્તિઃ ।
જાતોઽસ્મિ રાષ્ટ્રે કિલ મર્ત્યલોકે કીર્તિં સમૃદ્ધિં ચ દદાતુ મહ્યમ્ ॥ ૭॥

ક્ષુત્તૃટ્કૃશાઙ્ગી મલિનામલક્ષ્મીં તવાગ્રજાં તામુતનાશયામિ ।
સર્વામભૂતિં હ્યસમૃદ્ધિમમ્બે ગૃહાચ્ચ (ગૃહાચ્ચ) નિષ્કાસય મે દ્રુતં ત્વમ્ ॥ ૮॥

કેનાપ્યધર્ષામ્મથ ગન્ધચિહ્નાં પુષ્ટાં ગવાશ્વાદિયુતાં ચ નિત્યમ્ ।
પદ્માલયે સર્વજનેશ્વરીં તાં પ્રત્યાહ્વયેઽહં ખલુ મત્સમીપમ્ ॥ ૯॥

લભેમહિ શ્રીમનસશ્ચ કામં વાચસ્તુ સત્યં ચ સુકલ્પિતં વૈ ।
અન્નસ્ય ભક્ષ્યં ચ પયઃ પશૂનાં સમ્પદ્ધિ મય્યાશ્રયતાં યશશ્ચ ॥ ૧૦॥

મયિ પ્રસાદં કુરુ કર્દમ ત્વં પ્રજાવતી શ્રીરભવત્ત્વયા હિ ।

કુલે પ્રતિષ્ઠાપય મેં શ્રિયં વૈ ત્વન્માતરં તામુત પદ્મમાલામ્ ॥ ૧૧॥

સ્નિગ્ધાનિ ચાપોઽભિસૃજન્ત્વજસ્રં ચિક્લીતવાસં કુરુ મદ્ગૃહે ત્વમ્ ।
કુલે શ્રિયં માતરમાશુમેઽદ્ય શ્રીપુત્ર સંવાસયતાં ચ દેવીમ્ ॥ ૧૨॥

તાં પિઙ્ગલાં પુષ્કરિણીં ચ લક્ષ્મીમાદ્રાં ચ પુષ્ટિં શુભપદ્મમાલામ્ ॥

ચન્દ્રપ્રકાશાં ચ હિરણ્યરૂપાં મદર્થમાકારય જાતવેદઃ ॥ ૧૩॥

આદ્રાં(આર્દ્રાં) તથા યષ્ટિકરાં સુવર્ણાં તાં યષ્ટિરૂપામથ હેમમાલામ્ ।
સૂર્યપ્રકાશાં ચ હિરણ્યરૂપાં મદર્થમાકારય જાતવેદઃ ॥ ૧૪॥

યસ્યાં પ્રભૂતં કનકં ચ ગાવો દાસ્યસ્તુરઙ્ગાન્પુરુષાંશ્ચ સત્યામ્ ।
વિન્દેયમાશુ હ્યનપાયિનીં તાં મદર્થમાકારય જાતવેદઃ ॥ ૧૫॥

શ્રિયઃ પઞ્ચદશશ્લોકં સૂક્તં પૌરાણમન્વહમ્ ।
યઃ પઠેજ્જુહુયાચ્ચાજ્યં શ્રીયુતઃ સતતં ભવેત્ ॥ ૧૬॥

ઇતિ પૌરાણીકમ્ શ્રીસૂક્તં સમાપ્તમ્ ।

૧ મૃગીરૂપધરાં “શ્રીર્ધૃત્વા હરિણીરૂપમરણ્યે સઞ્ચાર હ” ઇતિ પુરાણવચનાત્

Encoded and proofread by Gopal Upadhyay gopal.j.upadhyay at gmail.com

*Shrisuktam from Puranas*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*